द्रष्टव्यो हि तृतीयोऽङ्घ्रिरन्त्यकोष्ठचतुष्टये॥ विन्यासभेदास्त्वन्येऽपि सन्त्येव बहवोऽत्र हि। विस्तरात्तु न लिख्यन्ते स्वयमूह्या विचक्षणैः”॥ एकाक्षरमुरजो यथा। “श्लोकस्यैकस्य पादेषु लिखितेषु चतुर्ष्वपि। लिम्पेदङ्ककरीह स्यान्नतुरेकाक्षरावली”। मुरजप्रस्तारो यथा। “क्रमेणैकस्य पादेषु प्रस्तृतेषु चतुर्ष्वपि। तुर्य्यान् मुरजमार्गेण श्लोकोऽयमुपजायते”। गोमूत्रिकाबन्धः। “गतिरुच्चावचा यत्र मार्गे मूत्रस्य गोरिव। गोमूत्रिकेति तत् प्राहुः दुष्करं चित्रवेदिनाम्। स॰क॰ तच्च नानाविधं दर्शितम्। “दुष्करत्वात् कठोरत्वात् दुर्बोधत्वादिना विधेः। दिङ्मात्रं दर्शितं चित्रं स्वयमूह्यं महात्मभिः” स॰क॰। “अनेकधा वृत्तवर्णविन्यासैः शिल्पकल्पना। तत्तत्प्रसिद्धवस्तूनां चित्रमित्यभिधीयते इति सामन्यतः सर्ववस्त्वाकारकल्पनया चित्रं भवतीत्युक्तम् अग्निपु॰ ।१६

१७ वाकोवाक्यम् “उक्तिप्रत्युक्तिमद्वाक्यं वाकोवाक्यं विदुर्बुधाः। द्वयोर्वक्त्रोस्तदिच्छन्ति बहूनामपि सङ्गमे। ऋजूक्तिरथ वक्रोक्तिर्वैयात्योक्तिस्तथैव च। गूढप्रश्नोत्तरोक्तिश्च तद्विदा त्रिविधैव तु” वाकोवाक्यम् १७।

१८ प्रहेलिका। “प्रहेलिका सकृत्प्रश्नः सापि षोढा च्युताक्षरा। दत्ताक्षरोभयं मुष्टिर्विन्दुमत्यर्थवत्यपि। क्रीड़ागोष्ठीविनोदेषु तज्ज्ञैराकीर्णमण्डले। परव्यामोहने चापि सोपयोगा प्रहेलिका”। तत्र “च्युताक्षरा “पयोधरभराक्रान्ता सन्नमन्ती पदे पदे। पदमेकं न का याति, यदि हारेण वर्जिता”। अत्राहारेणेत्याकारच्युतिः दत्ताक्षरा यथा। “कान्तयानुगतः कोऽयं पीनस्कन्धो मदोद्यतः। मृगाणां पृष्ठतो याति, शम्बरो रूढयौवनः”। शवर इति वक्तव्ये मकारो दत्तः। च्युतदत्ताक्षरा च्युतमन्यत् दत्तञ्चान्यदक्षरं यत्र सा यथा “विदग्धः सरसो रागी नितम्बोपरि संस्थितः। तरुण्यालिङ्गितः कण्ठे कलं कूजति को, विटः। अत्र घट इति वक्तव्ये वकारस्य च्युतिः विकारस्य दानमिति तथात्वम्। विन्दुमत्यादीनामुदाहरणानि स॰क॰द्रष्टव्यानि। प्रहेलिका१८।

१९ गूढम्। “क्रियाकारकसम्बन्धपदाभिप्रायवस्तुभिः। गोपितैः षड्विधं प्राहुर्गूढं गूढार्थवेदिभिः। ‘पाण्डवानां सभामध्ये दुर्य्योधन उपागतः। तस्मै गाञ्च हिरण्यञ्च सर्व्वाण्याभरणानि च”। अत्र क्रियापदम् गूढम्। योऽधन उपागतस्तस्मै गवादिकमदुरित्यर्थः। गूढम् १९

२० प्रश्नोत्तरम्। “यस्तु पर्य्यनुयोगस्य निर्भेदः क्रियते पदैः। विदग्धगोष्ठ्यां वाक्यैर्वा तं हि प्रश्नोत्तरं विदुः अन्तःप्रश्नबहिःप्रश्नबहिःरन्तःसमाह्वयैः। जातिगोत्रोत्तराभिख्यैः प्रश्नैस्तदपि षड्विधम्। प्रश्नोत्तरम् ।२०

२१अध्येयम् “यद्विधौ च निषेधे च व्युत्पत्तेरेव कारणम्। तदध्येयं विदुस्तेन लोकयात्रा प्रवर्त्तते”। अध्येयम् २१

२२ श्रव्यम् ‘श्रव्यं शास्त्रेतिहासौ च काव्यं शास्त्रं तथैव च। काव्येतिहासः शास्त्रेतिहासस्तदपि षड्विधम्”। यथा रघुवंशादि। श्रव्यम् ।२२

२३ प्रेक्ष्यम् “यदाङ्गिकैकनिवर्त्त्यमुज्झितं वाचिकादिभिः। नर्त्तकैरभिनीयेत प्रेक्ष्यं तत् क्ष्वेडितादिवत्। तल्लास्यं ताण्डवं चैव छलिकं शम्पया सह। हल्लीसकञ्च रासं च षट्प्रकारं प्रचक्षते”। शृङ्गाररसप्रधानत्वे लास्यं वीररसप्रधानत्वे ताण्डवं, शृङ्गारवीररसप्रधानत्वे छलिकमिति किन्नरविषयं छलिकमेव शम्पा। “मण्डलेन च यत्स्त्रीणां नृत्यं हल्लीसकं तु तत्। तन्नायको भवेदेको गोपस्त्रीणां हरिर्यथा। तदिदं हल्लीसकमेव तालबन्धविशेषयुक्तो रासः। प्रेक्ष्यम् २३।

२४ अभिनयः “अङ्गवाक्सत्वसंहार्य्याः सामान्याश्चित्र इत्यमी। षड्धा अभिनयास्तद्वदभिनेयं वचो विदुः”।२४

“चत्वारो विंशतिश्चैताः शब्दालङ्कारजातयः। शब्दसंदर्भमात्रेण हृदयं हर्तुमीशते” सर॰ कण्ठा॰। एतेषामुदाहरणानि विस्तरभयात् न लिखितानि तत एवावगन्तव्यानि। अर्थालङ्कारास्तु मतभेदेन बहवः तथाहि तेषां समष्टिः दण्डिना दर्शिता यथा। “स्वरूपाख्यानमुपमा रूपकं दीपकावली। आक्षेपोऽर्थान्तरन्यासो व्यतिरेको विभावना। समासोऽतिशयोत्प्रेक्षा हेतुः सूक्ष्मो लवः क्रमः। प्रेयोरसवदूर्जस्वि पर्यायोक्तं समाहितम्। उदात्तापह्नुतिश्लेषविशेषास्तुल्ययोगिता। विरोधाप्रस्तुतस्तोत्रे व्याजस्तुतिनिदर्शने। सहोक्तिः परिवृत्त्याशीःसङ्कीर्णमथ भाविकम्। इति वाचामलङ्कारा दर्शिताः पूर्व्वसूरिभि”। सरस्वतीकण्ठाभरणे तु वैराग्येन तेषां समष्टिरभिहिता यथा ‘अलमर्थमलङ्कर्त्तुं यत् व्युत्पत्त्यादिवर्त्मना। ज्ञेया जात्यादयः प्राज्ञैस्तेऽर्थालङ्कारसंज्ञया। जातिर्विभावना हेतुरहेतु सूक्ष्ममुत्तरम्। विरोधसम्भवान्योन्यं परिवृत्तिर्निदर्शना। भेदः समाहितं भ्रान्तिर्वितर्कौ मीलितं स्मृतिः। भावः प्रत्यक्षपूर्व्वाणि प्रमाणानि च जैमिनेः”। प्रत्यक्षानुमानोपमानार्थापत्त्यभावरूपाणि षट् इति चतुर्विंशतिः। एते